# Surya Upanishad

# સૂર્યોપનિષત્ સૂર્યાથર્વશીર્ષમ્ ચ

## Document Information

Text title : Surya Upanishad

File name : suryopan.itx

Category : upanishhat, navagraha

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 71/108; Atharva Veda, Samanya Upanishad, surya, navagraha

Latest update : May 2, 2007

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# સૂર્યોપનિષત્ સૂર્યાથર્વશીર્ષમ્ ચ

અથર્વવેદીય સામાન્યોપનિષત્ ।

સૂદિતસ્વાતિરિક્તારિસૂરિનન્દાત્મભાવિતમ્ ।
સૂર્યનારાયણાકારં નૌમિ ચિત્સૂર્યવૈભવમ્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ । ભદ્રં
પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ અથ સૂર્યાથર્વાઙ્ગિરસં વ્યાખ્યાસ્યામઃ ।
બ્રહ્મા ઋષિઃ । ગાયત્રી છન્દઃ । આદિત્યો દેવતા ।
હંસઃ સોઽહમગ્નિનારાયણયુક્તં બીજમ્ । હૃલ્લેખા શક્તિઃ ।
વિયદાદિસર્ગસંયુક્તં કીલકમ્ ।
ચતુર્વિધપુરુષાર્થસિદ્ધ્યર્થે વિનિયોગઃ ।
ષટ્સ્વરારૂઢેન બીજેન ષડઙ્ગં રક્તામ્બુજસંસ્થિતમ્ ।
સપ્તાશ્વરથિનં હિરણ્યવર્ણં ચતુર્ભુજં
પદ્મદ્વયાભયવરદહસ્તં કાલચક્રપ્રણેતારં
શ્રીસૂર્યનારાયણં ય એવં વેદ સ વૈ બ્રાહ્મણઃ ।
ૐ ભૂર્ભુવઃસુવઃ । ૐ તત્સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય
ધીમહિ । ધિયો યો નઃ પ્રચોદયાત્ ।
સૂર્ય આત્મા જગતસ્તસ્થુષશ્ચ । સૂર્યાદ્વૈ ખલ્વિમાનિ
ભૂતાનિ જાયન્તે ।
સૂર્યાદ્યજ્ઞઃ પર્જન્યોઽન્નમાત્મા નમસ્ત આદિત્ય ।
ત્વમેવ પ્રત્યક્ષં કર્મકર્તાસિ । ત્વમેવ પ્રત્યક્ષં બ્રહ્માસિ ।

ત્વમેવ પ્રત્યક્ષં વિષ્ણુરસિ ।
ત્વમેવ પ્રત્યક્ષં રુદ્રોઽસિ । ત્વમેવ પ્રત્યક્ષમૃગસિ ।
ત્વમેવ પ્રત્યક્ષં યજુરસિ ।
ત્વમેવ પ્રત્યક્ષં સામાસિ । ત્વમેવ પ્રત્યક્ષમથર્વાસિ ।
ત્વમેવ સર્વં છન્દોઽસિ ।
આદિત્યાદ્વાયુર્જાયતે । આદિત્યાદ્ભૂમિર્જાયતે । આદિત્યાદાપો
જાયન્તે । આદિત્યાજ્જ્યોતિર્જાયતે ।
આદિત્યાદ્વ્યોમ દિશો જાયન્તે । આદિત્યાદ્દેવા જાયન્તે ।
આદિત્યાદ્વેદા જાયન્તે ।
આદિત્યો વા એષ એતન્મણ્ડલં તપતિ । અસાવાદિત્યો બ્રહ્મ ।
આદિત્યોઽન્તઃકરણમનોબુદ્ધિચિત્તાહઙ્કારાઃ । આદિત્યો વૈ
વ્યાનઃ સમાનોદાનોઽપાનઃ પ્રાણઃ ।
આદિત્યો વૈ શ્રોત્રત્વક્ચક્ષૂરસનઘ્રાણાઃ । આદિત્યો વૈ
વાક્પાણિપાદપાયૂપસ્થાઃ ।
આદિત્યો વૈ શબ્દસ્પર્શરૂપરસગન્ધાઃ । આદિત્યો વૈ
વચનાદાનાગમનવિસર્ગાનન્દાઃ ।
આનન્દમયો જ્ઞાનમયો વિજ્ઞાનાનમય આદિત્યઃ । નમો મિત્રાય
ભાનવે મૃત્યોર્મા પાહિ ।
ભ્રાજિષ્ણવે વિશ્વહેતવે નમઃ । સૂર્યાદ્ભવન્તિ ભૂતાનિ
સૂર્યેણ પાલિતાનિ તુ ।
સૂર્યે લયં પ્રાપ્નુવન્તિ યઃ સૂર્યઃ સોઽહમેવ ચ । ચક્ષુર્નો
દેવઃ સવિતા ચક્ષુર્ન ઉત પર્વતઃ ।
ચક્ષુર્ધાતા દધાતુ નઃ । આદિત્યાય વિદ્મહે સહસ્રકિરણાય
ધીમહિ । તન્નઃ સૂર્યઃ પ્રચોદયાત્ ।
સવિતા પશ્ચાત્તાત્સવિતા
પુરસ્તાત્સવિતોત્તરાત્તાત્સવિતાધરાત્તાત્ ।
સવિતા નઃ સુવતુ સર્વતાતિં સવિતા નો રાસતાં દીર્ઘમાયુઃ ।
ઊઁઇત્યેકાક્ષરં બ્રહ્મ । ઘૃણિરિતિ દ્વે અક્ષરે । સૂર્ય
ઇત્યક્ષરદ્વયમ્ । આદિત્ય ઇતિ ત્રીણ્યક્ષરાણિ ।
એતસ્યૈવ સૂર્યસ્યાષ્ટાક્ષરો મનુઃ । યઃ સદાહરહર્જપતિ સ
વૈ બ્રાહ્મણો ભવતિ સ વૈ બ્રાહ્મણો ભવતિ ।
સૂર્યાભિમુખો જપ્ત્વા મહાવ્યાધિભયાત્પ્રમુચ્યતે ।

અલક્ષ્મીર્નશ્યતિ । અભક્ષ્યભક્ષણાત્પૂતો ભવતિ ।
અગમ્યાગમનાત્પૂતો ભવતિ । પતિતસમ્ભાષણાત્પૂતો ભવતિ ।
અસત્સમ્ભાષણાત્પૂતો ભવતિ ।
મધ્યાહ્ને સૂરાભિમુખઃ પઠેત્ ।
સદ્યોત્પન્નપઞ્ચમહાપાતકાત્પ્રમુચ્યતે ।
સૈષાં સાવિત્રીં વિદ્યાં ન કિઞ્ચિદપિ ન
કસ્મૈચિત્પ્રશંસયેત્ ।
ય એતાં મહાભાગઃ પ્રાતઃ પઠતિ સ ભાગ્યવાઞ્જાયતે ।
પશૂન્વિન્દતિ । વેદાર્થં લભતે ।
ત્રિકાલમેતજ્જપ્ત્વા ક્રતુશતફલમવાપ્નોતિ । યો હસ્તાદિત્યે
જપતિ સ મહામૃત્યું તરતિ ય એવં વેદ ॥

ઇત્યુપનિષત્ ॥

હરિઃ ૐ ભદ્રં કર્ણેભિરિતિ શાન્તિઃ ॥

ઇતિ સૂર્યોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Surya Upanishad*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*